# संस्कृतवार्ता:

**दिनाङ्क :-16.08.2025**

**प्रात: - 06:55**

<u>प्रधानमन्त्री-स्वतन्त्रता दिवसः</u>

ह्यः देशेन एकोनाशीतितमं स्वातन्त्र्यदिनं समाचरितम्। प्रधानमन्त्री नरेन्द्रमोदी देहल्याः रक्तदुर्गात् स्वातन्त्र्य-दिना-चरणस्य नेतृत्वं कुर्वन् राष्ट्रध्वजम् उत्तोलितवान्। ऐतिहासिकस्य स्मारकस्य प्राचीरात् राष्ट्रम् अभिसंबोधयन्, श्रीमोदी देशवासिभ्यः आग्रहं कृतवान् यत् ते भारतं आत्मनिर्भर कर्तुं, केवलं स्वदेशी उत्पादानाम् एव उपयोगं कर्तुं प्रतिज्ञां कुर्वन्तु।

श्रीमोदी, आपरेशन् सिन्दूर् इत्यस्य वीरसैनिकान् अभिवादयत्, अभियानमेतत् देशस्य सशस्त्रसेनायाः शौर्यस्य, यथार्थतायाश्च प्रबलम् प्रमाणम् अस्तीति उक्तवान्। सिन्धु-जल-सन्धिः अन्यायिनी आसीत् इति देशस्य जनाः अधुना अवागच्छन् इति प्रधानमन्त्री उल्लिखतवान्। सः अवदत् यत् भारतं इतोऽपि न्यूक्लियर्-इत्यस्य भयादोहनं न सहतीति।

शत्रूणां कस्यापि प्रयासस्य वैफल्याय शक्तियुतां शस्त्रव्यवस्थां निर्मातुं भारतम् मिशन-सुदर्शन-चक्रस्य आरम्भं करिष्यतीति प्रधानमन्त्री मोदी अवदत्। श्रीमोदी अवदत् यत्, अग्रिमेषु दशवर्षेषु, एतत् राष्ट्रियसुरक्षा-कवचम् विस्तारितं, सुदृढं, आधुनिकीकृतञ्च च भविष्यति। रक्षायाः, तन्त्रज्ञानस्य, ऊर्जायाः, अन्तरिक्षस्य, विनिर्माणस्य च क्षेत्रेषु भारतस्य प्रगतिम् उद्धृत्य, आत्मनिर्भरभारतं विकसित्-भारतस्य प्रमुखेषु आधार-स्तम्भेषु अन्यतमम् इति प्रधानमन्त्री अधोरेखितवान्। सः आपरेशन् सिन्दूर् इत्यस्य प्रशंसाम् कुर्वन् उक्तवान् यत् अभियानमिदं भारतस्य रक्षा-स्वावलंबनस्य निदर्शनमस्तीति।

श्रीमोदी अवदत् यत् सः कृषकाणां मत्स्यपालकानाञ्च हितस्य रक्षणार्थं भित्तिः भूत्वा स्थितः भविष्यति, भारतं कदापि तेषां हितविषये आपोषणं न करिष्यति इति। श्रीमोदी एकलक्षकोटि-रूप्यकाणां प्रमुख-वृत्ति-योजनायाः आरम्भं कृतवान्, यस्यान्तर्गतं नवनियोजित-युवकाः प्रतिमासं पञ्चदश-सहस्ररूप्यकाणि प्राप्नुयुरिति। प्रधानमन्त्री अवदत् यत्, अस्य वर्षस्यान्तं यावत् भारतं स्वदेशे निर्मितं सेमिकण्डक्टर् चिप्स् इत्यस्य प्रवर्तनमपि करिष्यतीति।

<u>जम्मू-कश्मीर मेघस्फोटः</u>

गुरुवासरे किश्तवाड-जनपदस्य पद्दार-उपविभागस्य दूरस्थपर्वतग्रामे प्रचण्डः मेघस्फोटः अभवत्, येन द्वौ सी. आई. एस्. एफ्. इत्यस्य कर्मिणौ, अनेके मचैल-माता-तीर्थयात्रिभिश्च सह न्यूनातिन्यूनं षष्ठी जनाः मृताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना जम्मू-कश्मीरस्य उपराज्यपालेन मनोजसिन्हा वर्येण तथा मुख्यमन्त्री ओमर् अब्दुल्ला इत्यनेन सह जम्मू-कश्मीरस्य किश्तवाड-क्षेत्रे मेघस्फोटस्य जलप्लावनस्य च स्थितिविषये वार्तालापः विहितः।

<u>राष्ट्रपति- नागालैण्ड राज्यपाल:</u>

राष्ट्रपति द्रौपदी मुर्मू प्रधानमन्त्री नरेन्द्रमोदी च नागालैण्ड राज्यस्य राज्यपालस्य एल. गणेसनस्य निधने दुःखं प्रकटितवन्तौ। तमिलनाडु-भारतीय-जनता-पार्टीति-दलस्य पूर्वाध्यक्षस्य एल. गणेसन वर्यस्य गतसायं त्रयोविंशति-निमेषाधिक-षड् वादने तमिलनाडुराज्यस्य चेन्नैनगरस्य अपोलो-चिकित्सालये निधनम् अभवत्।

<u>दक्षिणकोरिया-भारतयात्रा:</u>

दक्षिणकोरियादेशस्य विदेशमन्त्री चो ह्युन् ह्यः स्वस्य भारतस्य प्रथमद्विदिवसीययात्रायां नवदिल्लीनगरम् सम्प्राप्तवान्। यात्रावधौ सः विदेशमन्त्री डॉ. एस जयशङ्करेण सह द्विपक्षीयविमर्शस्य अतिरिक्तं अनेकेषु कार्यक्रमेषु भागं ग्रहीष्यति।

<u>जन्माष्टमी</u>

भगवतः श्रीकृष्णस्य जन्मस्य प्रतीकः जन्माष्टमी पर्व अद्य देशस्य विभिन्नेषु भागेषु हर्षोल्लासेन आमान्यते। श्रद्धालवः भगवतः श्रीकृष्णस्य पूजर्चानायै मन्दिरेषु गच्छन्ति। उत्तरप्रदेशे अस्मिन् अवसरे बॉके-बिहारी-मन्दिरं इस्कॉनमन्दिरं मथुरां वृन्दावनं च समेत्य नैके देवालयाः सज्जीभूताः।